# ॥ श्री दुर्गाष्टकम् ॥

## माँ दुर्गा , भय, भ्रम, नकारात्मकता और बाधाएँ दूर करती है

# Full Disclaimer

*This book is for educational, inspirational, and cultural purposes only. The remedies, rituals, affirmations, breathing methods, and spiritual practices described are based on traditional beliefs, historical customs, and personal development principles. They are not guaranteed solutions.*

*This book does not replace advice from licensed doctors, psychologists, financial advisors, lawyers, or other qualified professionals. If you have medical symptoms, mental health concerns, legal matters, or financial risk, seek professional help.*

*Use all remedies responsibly, ethically, peacefully, and according to local law. Do not use fire, herbs, fasting, incense, or physical practices in unsafe ways. The author and publisher are not liable for misuse.*

*Results in life depend on effort, discipline, timing, environment, skill, and many other factors. No spiritual method guarantees money, marriage, success, healing, or protection.*

Hargharpanditji
"PUJA ON YOUR SCREEN, BLESSINGS AT YOUR DOOR"

# ॥ श्री दुर्गाष्टकम् ॥

नमस्ते शरण्ये शिवे सानुकम्पे ।
नमस्ते जगद्व्यापिके विश्वरूपे ॥
नमस्ते जगद्वन्द्यपादारविन्दे ।
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥१॥

नमस्ते जगच्चिन्त्यमानस्वरूपे ।
नमस्ते महायोगिनि ज्ञानरूपे ॥
नमस्ते नमस्ते सदानन्दरूपे ।
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥२॥

अनाथस्य दीनस्य तृष्णातुरस्य ।
भयार्तस्य भीतस्य बद्धस्य जन्तोः ॥
त्वमेका गतिर्देवि निस्तारहेतु ।
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥३॥

अरण्ये रणे दारुणे शत्रुमध्ये ।
अनले सागरे प्रान्तरे राजगेहे ॥
त्वमेका गतिर्देवि निस्तारनौका ।
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥४॥

अपारे महादुस्तरेऽत्यन्तघोरे ।
विपत्सागरे मज्जतां देहभाजाम् ॥
त्वमेका गतिर्देवि निस्तारहेतु ।
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥५॥

नमश्चण्डिके चण्डदुर्दण्डलीले ।
समुत्खण्डिताखण्डिताशेषशत्रो ॥
त्वमेका गतिर्विघ्नसन्दोहहन्त्री ।
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥६॥

त्वमेका जिताराधिता सत्यवादि ।
अमेयाजिता क्रोधनाक्रोधनिष्ठा ॥
इडा पिङ्गला त्वं सुषुम्ना च नाडी ।
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥७॥

नमो देवि दुर्गे शिवे भीमनादे ।
सरस्वत्यरुन्धत्यघोरस्वरूपे ॥
विभूतिः शची कालरात्रिः सती त्वं ।
नमस्ते जगत्तारिणि त्राहि दुर्गे ॥८॥

## ॥ फलश्रुति ॥

इदं स्तोत्रं मया प्रोक्तमापदुद्धारहेतुकम् ।
त्रिसन्ध्यं एकसन्ध्यं वा पठेन्नरः सदा ॥
सर्वं दुःखं विनिर्मुक्तो लभते परमं पदम् ।
नात्र संशयः ॥

## ॥ इति श्री दुर्गाष्टकम् समाप्तम् ॥

Hargharpanditji
"PUJA ON YOUR SCREEN, BLESSINGS AT YOUR DOOR"